**Kaumodaki : Journal of Multidisciplinary Studies**
[ A Peer-Reviewed, Open Access Journal; Indexed in NepJOL ]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Committee, Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# पाणिनीयव्याकरणे षत्वविधायकानां सूत्राणामध्ययनम्

**प्रकाशतिवारी**
Department of Vyakaran (Sanskrit Grammar), Balmeeki Vidyapeeth (Campus), Kathmandu, Nepal

***Article History*** **:** *Submitted 15 Aug. 2021; Reviewed 07 Sept. 2021; Revised 12 Oct. 2021*
***Corresponding Author*** **:** *Prakash Tiwari,* ***Email*** **:** *prakash.tiwari@nsu.edu.np*
***DOI*** **:** *https://doi.org/......*

**सारः**

*वर्णानामतिशयितः सन्निधिः सामीप्येन यत्र उपस्थितिर्भवति स संहितापदेन ज्ञायते । संहितायामेव सन्धिर्भवति । अतिनिकटस्थितयोः, द्वयोर्वर्णयोः पदयोर्वा मेलनम् अथवा अतिसमीपस्थितौ द्वौ वर्णौ शब्दौ वा मिलित्वा एकीभवनं सन्धिः । शब्दधातुरूपनिर्माणार्थं वा सुबन्ततिङन्तकृत्यकृदन्ततद्धित-समस्तौपसर्गिकशब्दनिर्माणाय वाक्यरचनार्थञ्च सन्धेरुपयोगिता भवत्येव । स च सन्धि सिद्धान्तकौमुद्यां पञ्चधाऽस्ति । तत्र प्रथमोऽच्सन्धिः, द्वितीयो हल्सन्धिः, तृतीयः प्रकृतिभाव-सन्धिः, चतुर्थो विसर्गसन्धिः, पञ्चमस्तु स्वादिसन्धिः । सन्धिकार्ये षत्वविधानकार्यमपि प्राप्यते । अतः किं नाम षत्वम् ? पाणिनीयव्याकरणे षत्वविधेः प्रयोगः कथं क्रियते ? षत्वप्रक्रियायां के के नियमाः सन्ति ? इत्येतासां जिज्ञासानां शमनार्थमनुसन्धानमत्र विहितम् । शब्दव्युत्पादनक्रमे कस्मिनवस्थायां षत्वं भवति ? सन्धिकार्येषु षत्वं भवति न वेति सर्वत्र सन्देहो वरीवर्ति । तद्दूरीकरणाय षत्वविधानस्य सामान्यनियमप्रदर्शनपूर्वकं पाणिनीयव्याकरणे षत्वविधानस्य व्यवस्थाया विवेचनमत्र विधीयते । अष्टाध्याय्यामष्टमाध्याये द्वितीयपादे तृतीयपादे च प्रकरणद्वये पाणिनिना षत्वविषयिणी चर्चा विहिता । पाणिनीयाष्टाध्याय्यामष्टमाध्याये द्वितीयपादे व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८।२।३६॥ इति सूत्रादारभ्य तृतीयपादे सहेः पृतनर्ताभ्यां च ८।३।१०९॥ इति सूत्रपर्यन्तं षत्वविधायकानि द्विपञ्चाशत्-(५२) मितसङ्ख्यकानि सूत्राणि पाणिनिना प्रस्तुतानि सन्ति । सिद्धान्तकौमुद्यां नैकत्रस्थले षत्वविषयिणी चर्चा विद्यते । तद्ग्रन्थाध्ययनेन षत्वविषये विचिकित्सा सदैव वरीवर्ति । अतोऽहमपि लेखेऽस्मिन् तानि सूत्राण्याधृत्य षत्वविषयस्य चर्चां विदधे । अष्टाध्याय्यां येन क्रमेण सूत्राण्युपस्थापितानि सन्ति तेनैव क्रमेणाऽत्र प्रस्तौमि ।*

***शब्दकुञ्जी :*** *षत्वम्, षत्वादेशः, षत्वनिधेषः, षत्वविधानम्, षत्वविधायकसूत्रम्*

**विषयपरिचयः**

पाणिनीयव्याकरणे षत्वविधानमित्यनुसन्धानक्रमेऽत्र- किं नाम पाणिनीयं, किं व्याकरणं, षत्वञ्च किं तस्य विधानं कथं भवतीति । पाणिनिना प्रोक्तमिति विग्रहे पाणिनिशब्दात् तेन प्रोक्तम् ४।३।१०१॥ इति सूत्रेण छप्रत्ययेन पाणिनीयशब्दो निष्पद्यते । व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यो विविच्य साधुत्वेन बोध्यन्ते शब्दाः अनेनेति वेति विग्रहे

*copyright 2022 © the Author(s) and the Publisher*

वि आङ् इत्युपसृष्टद्वयपूर्वकात् करणार्थकडुकृञ्धातोः (पाणिनिः, धातुपाठः, १५४३) करणाधिकरणयोश्च ३।३।११७। इति सूत्रेण करणेऽधिकरणे वार्थे ल्युट्प्रत्ययेन व्याकरणशब्दोऽपि निष्पन्नतामेति । साधुशब्दज्ञानं हि व्याकरणस्य मुख्यं प्रयोजनम् । श्रुतिवाक्येऽपि– एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति, (पतञ्जलिः, पृ. ३६) इत्युक्तमस्ति । व्याकरणस्य नामान्तराणि शब्दशास्त्रम्, शब्दानुशासनम् इत्यादीनि । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् । केषां शब्दानाम् । लौकिकानां वैदिकानां चेति (पतञ्जलिः, पृ. ३६) पतञ्जलिः । तेन शब्दसाधुत्वबोधकं व्याकरणमिति निगद्यते । पाणिनिमुनिप्रोक्तञ्च व्याकरणं पाणिनीयं भवति । पाणिनीयं च तद् व्याकरणं चेति पाणिनीयव्याकरणं, तस्मिन् पाणिनीयव्याकरणे षत्वशब्देन मूर्धान्यषकारादेशो गृह्यते । तस्य विधानं षत्वविधानमित्युच्यते । तस्य विधानञ्च सूत्रवार्तिकादिभिः क्रियते । अत्रैतेषां विषयाणां समीक्षणं क्रियते । कतिपयस्थले पूर्वोक्तनिमित्तसत्त्वेऽपि प्रतिषेधो भवति, तादृशानां विषयाणामपि समीक्षास्मिन् शोधप्रबन्धे विधास्यते । तस्येदमित्यर्थे छप्रत्ययनिष्पन्नपाणिनीयशब्देन पाणिनिसम्बन्धीत्यप्यर्थः समायाति । तेन पाणिनीयव्याकरणे पाणिनिमुनिप्रणीता अष्टाध्यायी, धातुपाठः, गणपाठः, लिङ्गानुशासनम् इत्यादयो ग्रन्थाः, तदनुयायिभिः कात्यायनपतञ्जल्यादिभिर्विरचिता भाष्यवार्तिकादिग्रन्था अपि पाणिनीया भवन्ति । तथैव काशिकावृत्तिः, वैयाकरणसिद्धान्तकौमुदी इत्यादयोऽपि पाणिनीया एव । अत एव एते ग्रन्था अस्य शोधस्य मुख्यस्रोतांसि सन्ति । तान् ग्रन्थानाधृत्य लेखोऽयं विनिर्मितः ।

## शोधकार्यस्य समस्योद्देश्यञ्च

किं नाम षत्वम् ? पाणिनीयव्याकरणे षत्वविधेः प्रयोगः कथं क्रियते ? षत्वप्रक्रियायां के के नियमाः सन्ति ? इत्येतासां जिज्ञासानां शमनार्थं विहितस्यास्यानुसन्धानस्य एते प्रमुखा विषयाः समस्यारूपेण उपस्थापिताः सन्ति । लेखेऽस्मिन् पूर्वोक्तसमस्यासमाधानार्थमुद्देश्यानि निर्धारितानि सन्ति । तानि च- पाणिनीयमतमनुसृत्य षत्वनिर्वचनम्, तस्य स्वरूपप्रकाशनं षत्वविधायकसूत्रार्थप्रदर्शनपूर्वकं तेषां सोदाहरणं प्रयोगादीनां पर्यालोचनमत्र विहितमस्ति । तथैव भट्टोजिदीक्षितकृतसिद्धान्तकौमुद्यां यत्र तत्र विकीर्णतया स्थितानां षत्वविधायकसूत्राणां परिशीलनं तेषां सरलतया विवेचनञ्चात्र प्रदर्शितमस्ति ।

## शोधविधिः

शोधसामग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगः कृतो वर्तते । तेषु निगमनागमन-व्याख्यानात्मकविधयः प्रयुक्ताः सन्ति । प्रधानतयाऽत्र पाणिनीयाष्टाध्याय्यां प्रयुक्तानां षत्वविधायकानां सूत्राणां सोदाहरणं प्रयोगपरिशीलनक्रमे निगमनविधिः प्रयुक्तोऽस्ति । तथैव प्रामुख्येन पुस्तकालयविधिरेवात्र सामग्रीसङ्कलने प्रयुक्तः ।

## शोधसीमाङ्कनम्

अष्टाध्याय्यामष्टमाध्याये द्वितीयपादे तृतीयपादे च यानि षत्वविधायकानि सूत्राणि सन्ति, तानि सूत्राणि, तत्प्रसङ्गे यानि च वार्तिकानि भाष्यादिग्रन्थेषु सन्ति, तान्याधृत्य अष्टाध्यायी, व्याकरणमहाभाष्यम्, काशिकावृत्तिः, वैयाकरणसिद्धान्तकौमुदी इत्याद्यनेकग्रन्थानामालोडनेन कुत्र षत्वं भवति, कुत्र च न भवतीति विषयविवेचनमस्य शोधस्य सीमा वर्तते । पाणिनीयव्याकरणे येषां षत्वं विधीयते, तादृशानां शब्दानां पदानां वा प्रदर्शनमत्र विधास्यते ।

## विश्लेषणस्य सैद्धान्तिकाधारः

संस्कृतवाङ्मयस्य सर्वेष्वपि विषयेषु तत्तत् विषयकमूलग्रन्थः प्रधानरूपेण सैद्धान्तिकाधारो भवति । मूलग्रन्थकथनेन सूत्रग्रन्थाः वार्तिकग्रन्थाः, भाष्यग्रन्थाः, व्याख्याग्रन्थाः, टीकाग्रन्था इत्यादयः ग्रन्थाः समादरणेनावलम्ब्यन्ते । पाणिनीयव्याकरणे षत्वविधिविमर्शक्रमेऽत्रानुसन्धाने विषयविश्लेषणस्य सैद्धान्तिकाधाररूपेण पाणिनिकृताष्टाध्यायीस्थ सम्बद्धसूत्राणां गृहीतं वर्तते । तेषां सूत्राणां व्याख्यानविश्लेषणक्रमे सम्बद्धसूत्रार्थ-वृत्ति-वार्तिक-फक्किका-परिभाषेत्यादयः सम्यग्परिशीलितास्ति । तत्र क्रमे व्याकरणमहाभाष्य-काशिकावृत्ति-सिद्धान्तकौमुदी-इत्यादयः ग्रन्थाः सैद्धान्तिकाधारेण स्वीकृताऽस्ति ।

## विषयप्रवेशः

पाणिनीयाष्टाध्याय्यामष्टमाध्याये द्वितीयपादे तृतीयपादे च प्रकरणद्वये पाणिनिना षत्वविषयिणी चर्चा विहिता ।

पाणिनीयाष्टाध्याय्यामष्टमाध्याये द्वितीयपादे **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** ८।२।३६॥ इति सूत्रादारभ्य तृतीयपादे **सहेः पृतनर्ताभ्यां च** ८।३।१०९॥ इति सूत्रपर्यन्तं षत्वविधायकानि ५२ सूत्राणि पाणिनिना प्रस्तुतानि सन्ति । अस्मिन् लेखे षत्वविधायकानां सूत्राणामर्थास्तदुदाहरणानि च प्रस्तूयन्ते । षत्वप्रतिषेधकसूत्रवार्तिकानां समीक्षणं तेषामुदाहरणानाञ्च प्रदर्शनमस्य लेखस्य प्रमुखोद्देश्यं वर्तते । कृतेऽपि श्रमे भ्रमात् प्रमादादज्ञानाद्वा निबन्धेऽस्मिन् यास्त्रुटयः स्युस्तासां कृते क्षन्तव्योऽयमल्पज्ञो गुणग्राहिभिः सुधीभिः । सिद्धान्तकौमुद्यां नैकत्रस्थले षत्वविषयिणी चर्चा विद्यते । तद्ग्रन्थाध्ययनेन षत्वविषये विचिकित्सा सदैव वरीवर्ति । अतस्तत्सन्देहापकराणायाऽहं प्रयते । अष्टाध्याय्यां येन क्रमेण सूत्राण्युपस्थापितानि सन्ति तेनैव क्रमेणाऽत्र प्रस्तौमि ।

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** ८।२।३६॥

व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज् एतेषां शब्दानां, च्छकारान्तशब्दानां शकारान्तशब्दानाञ्च झलि परे तथा च पदान्ते षकारादेशो भवतीति सूत्रार्थः । व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते चेति (दीक्षितः, सू.सं. २९४, पृ. ७१) । अनेन सूत्रेण निर्दिष्टः षकारादेशः **अलोऽन्त्यस्य** १।१।५२॥ इत्यनेन स्थानिनः अन्तिमवर्णस्य स्थाने विधीयते । यथा- व्रश्च्+तुमुन् = व्रष्टुम्, भ्रस्ज्+तृच् = भ्रष्टा, सृज्+क्त = स्रष्ट, मृज्+तिप् = मार्ष्टि, यज्+तृच् = यष्टा, सम्राज् + भ्याम् = सम्राड्भ्याम्, भ्राज्+भ्याम् = भ्राड्भ्याम्, प्रच्छ्+तुमुन् = प्रष्टुम्, विश्+भ्याम् = विड्भ्याम् ।

**इणः षः ८।३ ।३९॥**

इण्-वर्णात् परस्य विसर्गस्य पाश-कल्प-क-काम्येषु परेषु षकारः भवतीति सूत्रार्थः । अस्मिन् सूत्रे प्रयुक्तः इण्-प्रत्याहारः 'लण्'-इत्यस्य णकारेण गृह्यते । अतः इण् प्रत्याहारे- इ, उ, ऋ, लृ, ए, ऐ, ओ, औ, ह्, य्, व्, र्, ल् एते वर्णाः समाविशन्ति । विसर्गात् परः ककारः/खकारः/पकारः/फकारः अस्ति चेत् **कुप्वोः ≍क≍पौ च** ८।३।३७ इत्यनेन विसर्गस्य विकल्पेन जिह्वामूलीय-उपध्मानीयौ भवतः, विकल्पाभावे च विसर्गः तादृशः एव तिष्ठति । परन्तु यदि तस्मात् विसर्गात् परः पाश्य-कल्प-क-काम्य एतेषु कश्चन शब्दः आगच्छति, तर्हि **सोऽपदादौ** ८।३।३८ इत्यनेन विसर्गस्य सकारादेशः विधीयते । यदि एतादृशः विसर्गः इण्-वर्णात् अनन्तरमागच्छति, तर्हि वर्तमानसूत्रेण सकारस्यापि अपवादरूपेण विसर्गस्य षकारादेशः क्रियते । अस्मिन् सूत्रे 'अपदादौ' इति उक्तमस्ति । अपदादौ = अपदस्य आदौ । अतः 'अपदादौ कुप्वोः' अस्यार्थः- सः कवर्गीयः/पवर्गीयः वर्णः यः अपदस्य आदौ अस्ति । इत्युक्ते, पदस्य आदौ नास्ति, कस्यचित् अन्यशब्दस्य आदौ अस्ति । कः अयमन्यशब्दः? अस्य उत्तरम् **सोऽपदादौ** ८।३।३८ अस्मिन् सूत्रे स्थितेन वार्तिकेन दीयते- पाश-कल्प-क-काम्येष्विति वाच्यम् । इत्युक्ते, यदि सः 'अन्यः शब्दः' पाश-कल्प-क-काम्य एतेषु कश्चन प्रत्ययः अस्ति, तर्हि अयम् षकारादेशः भवति । यथा- सर्पिः+पाशम् . सर्पिष्पाषम् । सर्पिः+कल्पम् . सर्पिष्कल्पम् । धनुः+क = धनुष्क । सः धनुः आत्मानम् इच्छति = सः धनुष्काम्यति । सर्पिष्कम् । सर्पिष्काम्यति (दीक्षितः, पृ. ३३) ।

**इदुदपधस्य चाप्रत्ययस्य ८।३।४१॥**

इकारोपधस्य उकारोपधस्य प्रत्ययावयवभिन्नस्य विसर्गस्य स्थाने क-ख-प-फकारे परे षकारादेशो भवति । ह्रस्व-इकारात् / ह्रस्व-उकारात् परः विद्यमानः विसर्गः यदि प्रत्यय-निर्मितः नास्ति, तर्हि तस्य स्थाने ककारे / खकारे / पकारे / फकारे परे षकारादेशः भवतीत्यस्य सूत्रस्याशयः । सामान्यरूपेण ह्रस्व-इकारात् ह्रस्व-उकारात् परः यः विसर्गः दृश्यते, सः प्रत्ययस्यैव वर्तते (झा, २०१३ : पृ. ३१) । यथा- मुनिः (सु-प्रत्ययस्य विसर्गः), मतिभिः (भिस्-प्रत्ययस्य विसर्गः), सर्पिः (इस् इति उणादिप्रत्ययस्य विसर्गः), धनुः (उस्-इति उणादिप्रत्ययस्य विसर्गः), आदयः । केषुचन एव शब्देषु प्रत्ययभिन्नः विसर्गः दृश्यते । काशिकायाम् एतेषाम् शब्दानामावली दत्ता अस्ति- निस्-निर्-दुस्-दुर्-बहिस्-आविस्-चतुर्-प्रादुस् । एतेषामन्तिमवर्णस्य यदि विसर्गादेशः भवति, तर्हि तस्य वर्तमानसूत्रेण षकारादेशः विधीयते (काशिकावृत्तिः, ८।३।४१॥) । उदाहरणानि एतानि- निस्+कृतम् = निष्कृतम्, दुस्+पातकम् = दुष्पातकम्, बहिस्+कृतम् = बहिष्कृतम्, आविस्+पतितम् = आविष्पतितम्, प्रादुस्+पीतम् = प्रादुष्पीतम्, निर्+पीतम् = निष्पीतम्, दुर्+कृत्यम् = दुष्कृत्यम्, चतुर्+कपालम् = चतुष्कपालम् । मुहुस्-शब्दः तु स्वरादिगणे अस्ति, अतः तस्य सकारः प्रत्ययनिर्मितः नास्ति । अतः

तस्य विषये मुहुसोः प्रतिषेधो वक्तव्यः अनेन वार्तिकेन षत्वम् निषिध्यते । यथा- मुहुस्+कामा, मुहुःकामा, मुहुःकामा ।

**द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ८ ।३ ।४३ ॥**

'कृत्व' इत्यस्मिन् अर्थे प्रयुज्यमानानाम् द्विस्/त्रिस्/चतुर्-शब्दानाम् इण्-वर्णात् परस्य विसर्गस्य कवर्गे पवर्गे वा परे विकल्पेन षकारादेशः भवतीति सूत्रार्थः (दीक्षितः, सू.सं., १५७, पृ. ३४)। तद्धितप्रकरणे 'कृत्वसुच्', 'सकृत्' तथा 'सुच्' एते त्रयः प्रत्ययाः अस्मिन्नेव अर्थे उक्ताः सन्ति। एतेभ्यः 'सुच्' प्रत्ययस्य विषये एव वर्तमानसूत्रस्य प्रसक्तिः अस्ति, अतः अत्र 'सुच्' प्रत्ययं एव पश्यामः।'सुच्' अयं प्रत्ययः **द्वित्रिचतुर्भ्यः सुच्** ५।४।१८ अनेन सूत्रेण द्वि, त्रि, तथा चतुर्-एतेभ्यः प्रातिपदिकेभ्यः कृत्वर्थे विधयते। एतत् सूत्रम् द्विस्, त्रिस्, चतुर्- एतेषाम् शब्दानाम् विषये उक्तमस्ति । एतेषामन्तिमवर्णस्य यः विसर्गः भवति, तस्य कवर्गे पवर्गे परे **कुप्वोः ≍क ≍पौ च** ८।३।३७ इत्यनेन सूत्रेण विकल्पेन जिह्वामूलीये/उपध्मानीये प्राप्ते वर्तमानसूत्रेण विकल्पेन षकारादेशोऽपि भवति । यथा- द्विः+करोति = द्विष्करोति, द्विःकरोति, द्विःकरोति । त्रिः+करोति = त्रिष्करोति, त्रिःकरोति, त्रिःकरोति । चतुः करोति = चतुष्करोति, चतुःकरोति, चतुःकरोति ।

**इसुसोः सामर्थ्ये ८।३ ।४४॥**

इस्/उस्-प्रत्यययोः विसर्गस्य कवर्गे पवर्गे च परे सामर्थ्ये विकल्पेन षकारादेशो भवति। एकस्य पदस्य अन्येन पदेन सह अन्वयस्य शक्तिः सामर्थ्यम् नाम्ना ज्ञायते । यथा- 'गच्छति राज्ञः पुत्रः', अस्मिन् वाक्ये 'राज्ञः' पदस्य सम्बन्धः 'पुत्रः' अनेन सह अस्ति, अतः 'राज्ञः' तथा 'पुत्रः' एतयोर्शब्दयोर्मध्ये 'सामर्थ्यम्' अस्तीत्युच्यते । इस्/उस्-एतौ द्वौ उणादि-प्रत्ययौ स्तः । भिन्नैः उणादिसूत्रैः अनयोः प्रत्यययोः विधानं भवति । अर्चिस्, सर्पिस्, शोचिस्, छदिस्, हविस्-एते शब्दाः इस्-प्रत्ययान्तशब्दाः सन्ति, तथा धनुस्, चक्षुस्, जनुस्, वपुस्, तनुस्, आयुस- एतादृशाः शब्दाः उस्-प्रत्ययान्तशब्दाः सन्ति । यदि इस्/उस्-प्रत्ययस्य विसर्गात् परः कवर्गस्य / पवर्गस्य वर्णः आगच्छति, तर्हि तस्य विसर्गस्य सामर्थ्ये सति विकल्पेन षकारो भवति । यथा- त्वम् सर्पि≍पिब/त्वम् सर्पिःपिब, तिष्ठतु सर्पि≍पिब त्वमुदकम्/ तिष्ठतु सर्पिः पिब त्वमुदकम् । सः यजुष्करोति, सः यजुः≍करोति, सः यजुःकरोति ।

**नित्यं समासेऽनुत्तरपदस्थस्य ८।३ ।४५॥**

समासस्य विषये- इस्/उस्-प्रत्यययोः विसर्गस्य कवर्गे पवर्गे च परे सामर्थ्ये नित्यम् षकारादेशः भवतीति सूत्रार्थः। परन्तु पूर्वपदम् स्वयम् कश्चन समासः अस्ति चेत् षकारादेशः निषिध्यते । इसुसोः सामर्थ्ये ८।३।४५॥ अनेन सूत्रेण इस्/उस्-प्रत्ययस्य विसर्गात् अनन्तरम् कवर्गस्य/पवर्गस्य वर्णे स्थिते; सामर्थ्ये सति; सन्धिं कर्तुम् इच्छामश्चेत्; विसर्गस्य विकल्पेन षत्वं विधीयते । अस्यैव अपवादद्वयम् वर्तमानसूत्रेण विधीयते- (१) समस्तपदस्य निर्माणम् भवति, तर्हि तत् षत्वम् नित्यम् भवति । (२) यदि समस्तपदस्य निर्माणे पूर्वपदमपि स्वयं कश्चन समासः अस्ति चेत नित्यम् निषिध्यते । यथा- धनुष्काण्डम् । शिवधनुःकाण्डम्, शिवधनु≍काण्डम् । धनुष्काण्डम्, धनु≍काण्डम्, धनुःकाण्डम् ।

'कस्कादिगणः' नाम कश्चन गणः गणपाठे दत्तः अस्ति । अस्मिन् गणे आचार्यः तेषाम् शब्दानाम् निपातनं करोति येषु विसर्गस्य सकारः/षकारः कर्तव्यः, परन्तु तदर्थमष्टाध्याय्याम् किमपि सूत्रम् नास्ति । 'सर्पिष्कुण्डिका', 'धनुष्कपालम्', यजुष्पात्रम्' एते शब्दाः अस्मिन् गणे निर्दिष्टाः सन्ति । वस्तुतः वर्तमानसूत्रेण समासे कृते एतेषु षत्वम् विधीयते एव । परन्तु एते शब्दाः कस्कादिगणे सन्ति, अतः एतेषाम् शब्दानाम् विषये 'सर्वदा' षत्वम् भवतीति ज्ञातव्यम् । इत्युक्ते- समासः भवेत् वा न भवेत्; सामर्थ्यं भवेत् वा न भवेत्; पूर्वपदम् स्वयं समस्तपदम् स्यात् वा न स्यात्- सर्वासु स्थितिषु एतेषाम् विषये षत्वं भवतीत्यर्थः । यथा- 'तिष्ठतु सर्पिः, कुण्डिकामानय' अस्मिन् वाक्ये यद्यपि सामर्थ्यं नास्ति तथापि संहितायां सत्यां विसर्गस्य षत्वं कृत्वा 'तिष्ठतु सर्पिष्कुण्डिकामानय' इत्येव सिद्ध्यति । तथैव, 'धनुः कपालम् छिन्नति' इत्यत्रापि षत्वे कृते 'धनुष्कपालं छिनत्ति' इति जायते । उक्तञ्च सिद्धान्तकौमुद्याम्- इसुसोर्विसर्गस्यानुत्तरपदस्थस्य नित्यं षः स्यात् कुप्वोः परयोः (दीक्षितः, सू.सं., १५९, पृ. ३५) । सर्पिष्कुण्डिका । धनुष्कपालकम् । अनुत्तरपदस्थस्येति किम् । परमसर्पि कुण्डिका । कस्कादिषु सर्पिष्कुण्डिका-शब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थः । व्यपेक्षायां नित्यार्थश्चेति ।

**कस्कादिषु च ८।३ ।४८॥**

कस्कादिगणे निर्दिष्टानां शब्दानां विषये विसर्गस्य सकारादेशो भवतीति सूत्रार्थः । इण्-वर्णात् परः तु षकारादेशो

भवति । कस्कादिगणः, अयं गणपाठस्य १४४-तमः गणोऽस्ति । अस्मिन् गणे आचार्यः तेषां शब्दानां निपातनं करोति येषु विसर्गस्य सकारः/षकारः कर्तव्यः, परन्तु तदर्थमष्टाध्याय्याम् किमपि सूत्रम् नास्ति । अस्मिन् गणे निर्दिष्टाः शब्दाः 'यथानिर्दिष्टाः' प्रयोक्तव्याः, तेषां विषये विसर्गस्य सकारः/षकारः कथमभवत् अस्मिन् विषये चर्चा मास्तु- इति अस्य आशयः । अस्मिन् गणे उपस्थितेषु शब्देषु इण्-वर्णात् परस्य विसर्गस्य षकारादेशः कृतः दृश्यते, अकार-आकारात् परस्य विसर्गस्य सकारादेशः कृतः दृश्यते । अस्मिन् गणे आहत्य १८ शब्दाः सन्ति । तेषामावली इयम्- कस्कः, कौतस्कुतः, भ्रातुष्पुत्रः, शुनस्कर्णः, सद्यस्कालः, सद्यस्कीः, साद्यस्कः, कांस्कान्, सर्पिष्कुण्डिका, धनुष्कपालम्, बहिष्पलम्, यजुष्पात्रम्, अयस्कान्तः, तमस्काण्डः, अयस्काण्डः, मेदस्पिण्डः, भास्करः, अहस्करः (पाणिनिः, गणपाठः, ग.सू.सं., २५३, पृ. ७२८) । आकृतिगणोऽयम् । कस्मिंश्चित् शब्दे यदि शिष्टप्रयोगेन विसर्गस्य सकारादेशः/षकारादेशः कृतः अस्ति परन्तु तदर्थं किमपि सूत्रं न अवगम्यते, तर्हि तस्य शब्दस्य अस्मिन् गणे समावेशः भवितुमर्हति ।

**सहेः साडः सः ८।३।५६॥**

साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यादिति दीक्षितः (दीक्षितः, सू.सं. ३३५) । सह्-धातोः 'साड्' अस्य रूपस्य अपदान्तसकारस्य मूर्धन्यः षकारो भवतीति सूत्रार्थः । **षह मर्षणे** (९२४ धा.पा.) इति भ्वादिगणस्य कश्चन धातुः । अस्य धातोः 'साड्' इति रूपान्तरं प्रक्रियायां दृश्यते, तर्हि अस्य सकारस्य षकारादेशो भवति । यथा, 'तुरम् (वेगम्) सहते' अस्मिन् अर्थे सह-धातोः 'तुरासाह्' इति हकारान्तः शब्दः सिद्ध्यति । अस्य प्रथमैकवचनस्य प्रक्रियायाम्- तुरासाह् शब्दात् प्रथमैकवचनस्य सुप्रत्ययेऽनुबन्धलोपे, **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** ६।१।६८ इति सूत्रेण सुप्रत्ययस्य लोपः तुरासाह् इति जाते **हो ढः** ८।२।३१ इति सूत्रेण पदान्तहकारस्य ढकारे तुरासाढ् इति जाते, **झलां जशोऽन्ते** ८।२।३९॥ इति सूत्रेण ढकारस्य डकारे तुरासाड् इति जाते **सहे साडः सः** ८।३।५६॥ इत्यनेन सूत्रेण सह-धातुनिर्मितः यः साड्-शब्दः, तस्य अपदान्तस्य सकारस्य मूर्धन्यषकारादेशे तुराषाड् इति जाते **वाऽवसाने** ८।४।५६॥ इति सूत्रेण वैकल्पिकचर्त्वे तुराषाड्, तुराषाट् इति । तथैव तुरासाहौ । तुरासाहः । तुराषाड्भ्यामित्यादि । तुरं सहत इत्यर्थे **छन्दसि सहः** ३।२।६३॥ इति ण्विः । लोके तु साहयतेः क्विप् । **अन्येषामपि दृश्यते** ६।३।१३७॥ इति पूर्वपदस्य दीर्घो भवति ।

**नुम्विसर्जनीयशर्व्यवायेऽपि ८।३ ।५८॥**

एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात् (दीक्षितः, सू.सं. ३३४) । 'इण्कोः' अस्मिन् अधिकारे निर्दिष्टः सकारस्य षकारादेशः अनुस्वार/विसर्ग/शर्वर्णः एतेषु कस्यचन एकस्य व्यवधाने सति अपि भवतीत्यर्थः । **अपदान्तस्य मूर्धन्यः** ८।३।५५॥ अस्मिन् अधिकारे सकारस्य यः मूर्धन्यः षकारादेशः विधीयते, सः सकारात् परः अनुस्वारः / विसर्गः / शकारः / षकारः / सकारः अस्ति चेदपि भवति । परन्तु एतेषाम् द्वयोः अधिकानाम् व्यवधानमस्ति चेत् न भवति । उदाहरणानि एतादृशानि- अनुस्वारस्य व्यवधानेऽपि सकारस्य षकारः भवति (शास्त्री, २०१४, पृ. ४६४) । यथा- धनूंषि इत्यत्र **आदेशप्रत्यययोः** ८।३।५९॥ इत्यनेन इण्कोः परस्य सकारस्य षकारः । **नुम्विसर्जनीयशर्व्यवायेऽपि** ८।३।५८॥ इत्यनेन अयं षकारः अनुस्वारस्य व्यवधाने अपि भवति । विसर्गस्य व्यवधानेऽपि सकारस्य षकारः भवति । यथा- धनुःषु इत्यत्र **आदेशप्रत्यययोः** ८।३।५९॥ इत्यनेन इण्कोः परस्य सकारस्य षकारो भवति । **नुम्विसर्जनीयशर्व्यवायेऽपि** ८।३।५८॥ इत्यनेन अयं षकारः विसर्गस्य व्यवधाने अपि भवति । शर्वर्णस्य व्यवधानेऽपि सकारस्य षकारः भवति । यथा- धनुष्षु इत्यत्र **आदेशप्रत्यययोः** ८।३।५९॥ इत्यनेन इण्कोः परस्य 'सु' इत्यस्य सकारस्य षकारो भवत्येव । **नुम्विसर्जनीयशर्व्यवायेऽपि** ८।३।५८॥ इत्यनेन अयं षकारः सकारस्य व्यवधाने अपि भवति । अत्र 'धनुस्+सु' इत्यत्र धनुस्-शब्दस्य सकारः यद्यपि विसर्गादेशस्य सकारः अस्ति, तथापि सः 'पदान्ते' अस्ति, अतः **आदेशप्रत्यययोः** ८।३।५९॥ इत्यनेन तस्य षत्वं न भवति । केवलं प्रत्ययसकारस्य षत्वं कर्तुम् **आदेशप्रत्यययोः** ८।३।५९॥ इत्यस्य प्रयोगः क्रियते । अनुस्वारः / विसर्गः / शर्-एतेभ्यः द्वयोः अधिकानाम् वा व्यवधानमस्ति चेत् सकारस्य षत्वम् न भवति । यथा- णिसि चुम्बने इत्यदादिगणस्य आत्मेनपदी धातुः । अस्य लट्-लकारस्य मध्यमपुरुषैकवचने निंस्से अत्र प्रक्रियायाम् इण्-वर्णात् परः 'से' प्रत्ययस्य सकारः अस्ति । परन्तु एतयोर्मध्ये अनुस्वारस्य तथा च शर्-वर्णस्य एतयोः उभयोः व्यवधानमस्ति । अतः अत्र **नुम्विसर्जनीयशर्व्यवायेऽपि** ८।३।५८ इत्यस्य प्रसक्तिः नास्ति, अतः अत्र षत्वं न भवति ।

**आदेश प्रत्यययोः ८।३ ।५९॥**

सहेः साडः सः ८।३।५६॥ इति सूत्रात्स इति षष्ठ्यन्तं पदमनुवर्तते । इण्-कवर्गाभ्यां परस्याऽपदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यादिति सूत्रार्थः (दीक्षितः, सू.सं., २१२) । विवृताघोषस्य सस्य तादृश एव षः । इण्कोः परस्य अपदान्तस्य आदेशरूपस्य प्रत्ययावयवरूपस्य वा सकारस्य मूर्धन्यः आदेशः भवति । यदि कश्चन सकारः स्वयम् आदेशरूपेण विहितः अस्ति, अथवा कस्यचन प्रत्ययस्य अवयवः अस्ति, तर्हि तादृशस्य इण्कोः परस्य सकारस्य (अनुस्वार/विसर्ग/शर्-वर्णस्य व्यवायेऽपि) षकारादेशो भवति । 'इण्' इत्यत्र परस्य णकारस्य (लण्-प्रत्याहारस्य णकारस्य) ग्रहणं भवति । अतः इण् प्रत्याहारे अ/आ-एतौ विहाय सर्वे स्वराः, अन्तस्थाः तथा हकारः समाविश्यन्ते । एवमेव 'कु' इत्यनेन सर्वेषां कवर्गीयवर्णानां ग्रहणं भवति । उदाहरणानि- वाक्षु, पठिष्यति, सिषेच ।

**शासिवसिघसीनां च ८।३ ।६०॥**

शासि-वसि-घसीत्येतेषां च इण्कोः उत्तरस्य यकारस्य मूर्धन्यो भवति (काशिकावृत्तिः, ८।३।६०॥) । इण्कुभ्यां परस्यैषां सस्य षः स्यात् (दीक्षितः, सू.सं., २४१०) । इण्कोः परस्य शास्/वस्/घस्-धातूनामपदान्तसकारस्य षकारादेशो भवतीति सूत्रार्थः । शासु (अनुशिष्टौ) इति अदादिगणस्य धातुः । वस (निवासे) तथा घस्लृ (अदने) एतौ भ्वादिगणस्य धातू । एतयोः इण्कोः उत्तरस्य सकारस्य षकारादेशः भवति । अद्-धातोः आर्धधातुके प्रत्यये परे **लिट्यन्यतरस्याम्** २।४।४०॥ इत्यनेन यः वैकल्पिकः घस्लृ-आदेशः भवति तस्य अपि अनेन सूत्रेण ग्रहणं भवति, अतः तस्यापि इण्कोः उत्तरस्य सकारस्य षकारादेशो भवति । यथा- शिष्ट, उष्यते, जक्षुः ।

**स्तौतिण्योरेवषण्यभ्यासात् ८।३ ।६१॥**

स्तौतेः ण्यन्तानां च षभूते सनि परतः अभ्यासातिणः उत्तरस्य आदेशसकारस्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।६१॥) । अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्षभूते सनि नान्यस्य (दीक्षितः, सू.सं., २६२७) । तुष्टूषति । द्युतिस्वाप्योः- इत्युत्वम् । सुष्वापयिषति । सिषाधयिषति । स्तौतिण्योः किम् । सिसिक्षति । उपसर्गात्तु **स्थादिष्वभ्यासेन च** इति षत्वम् । परिषिषिक्षचि । षणि किम् । तिष्ठासति । सुषुप्सति । अभ्यासादित्युक्तेर्नेह निषेधः । इण् । प्रतीषिषति । इक् । अधीषिषति ।

**सः स्विदिस्वदिसहीनां च ८।३ ।६२॥**

स्विदि स्वदि सहि इत्येतेषां ण्यन्तानां सनि षभूते परतोऽभ्यासादुत्तरस्य सकारस्य सकारादेशो भवति (काशिकावृत्तिः, ८।३।६२॥) । स्विदि सिस्वेदयिषति । स्वदि सिस्वादयिषति । सहि सिसाहयिषति । सकारस्य सकारवचनं मूर्धन्यनिवृत्त्यर्थम् । अभ्यासेणः परस्य ण्यन्तानामेषां सस्य स एव न षः षणि परे (दीक्षितः, सू.सं., २६२८) । सिस्वेदयिषति । सिस्वादयिषति । सिसाहयिषति । स्थादिष्वभ्यासेनेति नियमान्नेह । अभिसुसूषति । शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः । सरूपः प्रत्ययो नेष्टः सन्नन्तान्न नसिष्यते (पतञ्जलिः, ८।३।६२॥) । शैषिकाच्छैषिकः सरूपो न, तेन शालीये भव इति वाक्यमेव । न तु छान्ताच्छः ।

**प्राक्सितादड्व्यवायेऽपि ८।३ ।६३॥**

सेवसित ८।३।७० इति वक्ष्यति । प्राक् सितसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः तत्र अड्व्यवायेऽपि मूर्धन्यो भवति इत्येवं तद् वेदितव्यम्, अपिशब्दादनड्व्यवायेऽपि (काशिकावृत्तिः, ८।३।६३॥) । वक्ष्यति उपसर्गात् सुनोतिसुवतीति षत्वम् । अभिषुणोति । परिषुणोति । वषुणोति । निषुणोति । अभ्यषुणोति । पर्यषुणोत् । व्यषुणोत् । न्यषुणोत् । सेवसित इत्यत्र सितशब्दात्प्राग् ये सुनोत्यादयस्तेषामड्व्यवायेऽपि षत्वं स्यात् (दीक्षितः, सू.सं., २२७५) । न्यषेधत् । न्यषेधीत् । न्यषेधिष्यत् ।

**स्थादिष्वभ्यासेन चाभ्यासस्य ८।३ ।६४॥**

प्राक् सितातिति वर्तते । उपसर्गात् सुनोति इत्यत्र स्थासेनयसेध इति स्थादयः, तेसु स्थादिषु प्राक् सितसंशब्दनातभ्यासेन व्यवाये मूर्धन्यो भवति, अभ्याससकारस्य च भवति इत्येवं वेदितव्यम् (काशिकावृत्तिः, ८।३।६४॥) । अभ्यासेन व्यवाये अषोपदेशार्थं च अभिषिषेणयिषति, परिषिषेणयिषति । अवर्णान्ताभ्यासार्थं च अभितष्टौ, परितष्टौ । षणि प्रतिषेधार्थं

च अभिषिषिक्षति, परिषिषिक्षति । अभ्यासस्य इति वचनम् नियमार्थम्, स्थादिषु एव अभ्याससकारस्य् मूर्धन्यो भवति, न अन्यत्र । अभिसुसूषति । अभिसिषासति । प्राक् सितात् स्थादिष्वभ्यासेन व्यवायेऽपि षत्वं स्यात् । एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम् । निषिषेध । निषिषिधतुः (दीक्षितः, सू.सं.२२७७) ।

**उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ८।३ ।६५॥**

मूर्धन्य इति वर्तते, सः इति च । उपसर्गस्थान् निमित्तातुत्तरस्य सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्ज इत्येतेषां सकारस्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।६५॥) । सुनोति अभिषुणोति । परिषुणोति । अभ्यषुणोत् । परिषिष्वङ्क्षते । सेध इति शब्विकरणनिर्देशः सिध्यतिनिवृत्त्यर्थः । अभिषावयति इत्यत्र तु सुनोतिमेव प्रति क्रियायोगः, न सावर्यतिं प्रतीति षत्वं भवति ।

**सदिरप्रते ८।३ ।६६॥**

सदेः सकारस्य उपसर्गस्थान् निमित्तातप्रतेः उत्तरस्य मूर्धन्य आदेशो भवति (काशिकावृत्तिः, ८।३।६६॥) । निषीदति । विषीदति । न्यषीदत् । व्यषीदत् । निषसाद । विषसाद । अप्रतेः इति किम् ? प्रतिसीदति । सिद्धान्तकौमुद्यान्तु प्रतिभिन्ना-दुपसर्गात्सदेः सस्य षः स्यात् (दीक्षितः, सू.सं., २२७१) ।

**स्तन्भेः ८।३ ।६७॥**

उपसर्गातिति वर्तते । स्तन्भेः सकारस्य उपसर्गस्थान् निमित्तातुत्तरस्य मूर्धन्य मुर्धन्य आदेशो भवति (काशिकावृत्तिः, ८।२।३६॥) । अभिष्टभ्नाति । परिष्टभ्नाति । अभ्यष्टभ्नात् । पर्यष्टभ्नात् । अभितष्टम्भ । परितष्टम्भ । अप्रतेः इत्येतदिह न अनुवर्तते, तेन एतदपि भवति, प्रतिष्टभ्नाति, प्रयष्टभ्नात्, प्रतितष्टम्भ । स्तन्भेः सौत्रस्य सस्य षः स्यात् (दीक्षितः, सू.सं., २२७२) । योगविभाग उत्तरार्थः । किंच । अप्रतेरिति नानुवर्तते । बाहुप्रतिष्टम्भविवृद्धमन्युः ।

**अवाश्चालम्बनाविदूर्ययोः ८।३ ।६८॥**

अवशब्दातुपसर्गातुत्तरस्य स्तन्भेः सकारस्य मूर्धन्यः आदेशो भवति, आलम्बनेऽर्थे आविदूर्ये च (काशिकावृत्तिः, ८।३।६८॥) । आलम्बनमाश्रयणम् । अविदूरस्य भावः आविदूर्यम् । आलम्बने तावत् अवष्टभ्यास्ते । अवष्टभ्य तिष्ठति । आविदूर्ये अवष्टब्धा सेना । अवष्टब्धा शरत् । आलम्बनाविदूर्ययोः इति किम् ? अवस्तब्धो वृषलः शीतेन । अनिगर्थः आरम्भः । सिद्धान्तकौमुद्यान्तु अवात्स्तन्भेरेतयोरर्थयोः षत्वं स्यात् (दीक्षितः, सू.सं., २२७३) ।

**वेश्च स्वनो भोजने ८।३ ।६९॥**

वेः उपसर्गातवात् च उत्तरस्य भोजनार्थे स्वनतेः सकास्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।६९॥) विष्वणति । व्यष्वणत् । विषष्वाण । अवष्वणति । अवाष्वणत् । अवषष्वाण । अभ्यवहारक्रियाविशेषोऽभिधीयते, यत्र स्वननमस्ति । भोजने इति किम्? विस्वनति मृदङ्गः । अवस्वनति मृदङ्गः । व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने (दीक्षितः, सू.सं., २२७४) ।

**परिनिविभ्यः सेवसितसयसिवुसहस्सुट्स्तुस्वञ्जाम् ८।३ ।७०॥**

परि नि वि इत्येतेभ्याः उपसर्गेभ्यः उत्तरेषाम् सेव सित सय सिवु सह सुट् स्तु स्वञ्ज इत्येतेषाम् सकारस्य मूर्धन्य आदेशः भवति (काशिकावृत्तिः, ८।३।७०॥) । परिषेवते । निषेवते । विषेवते । पर्यषेवत । न्यषेवत । व्यषेवत । परिषिषेविषते । निषिषेविषते । विषिषेविषते । सित परिषितः । निषितः । विषितः । सय परिषयः । निषयः । विषयः । सिव् परिषीव्यति । निषीव्यति । विषीव्यति । पर्यषीव्यत् । न्यषीव्यत् । व्यषीव्यत् । पर्यसीव्यत् । न्यसीव्यत् । व्यसीव्यत् । सह परिषहते । निषहते । विषहते । पर्यषहत । न्यषहत । व्यषहत । पर्यसहत । न्यसहत । व्यसहत । सुट् परिष्करोति । पर्यष्करोत् । पर्यस्करोत् । स्तु परिष्टौति । निष्टौति । विष्टौति । पर्यष्टौत् । न्यष्टौत् । व्यष्टौत् । पर्यस्तौत् । न्यस्तौत् । व्यस्तौत् । स्वञ्ज दंशसञ्जस्वञ्जाम् इति नलोपः । परिष्वजते । निष्वजते । विष्वजते । पर्यष्वजत, पर्यस्वजत । पूर्वेण एव सिद्धे स्तुस्वञ्जिग्रहणमुत्तरार्थम्, अड्व्यवाये विभाषा यथा स्यात् । परिनिविभ्यः परेषामेषां सस्य षः स्यात् । निषेधति (दीक्षितः, सू.सं., २२७५) ।

**सिवादीनां वाऽड्व्यवायेऽपि ८।३।७१॥**

अनन्तरसूत्रे सिवुसहसुट्स्तुस्वञ्जाम् इति सिवादयः (काशिकावृत्तिः, ८।३।७१॥) । सिवादीनामड्व्यवायेऽपि

परिनिविभ्यः उत्तरस्य सकारस्य वा मूर्धन्यो भवति । तथा चिअवोदाहृतम् । परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि । पर्यसहत । पर्यषहत (दीक्षितः, सू.सं., २३५९) ।

**अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ८।३।७२॥**

अनु वि परि अभि नि इत्येतेभ्यः उत्तरस्य स्यन्दतेः अप्राणिषु सकारस्य वा मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।७२॥) अनुष्यन्दते । विष्यन्दते । परिष्यन्दते । अभिष्यन्दते तैलम् । निष्यन्दते । अनुस्यन्दते । विस्यन्दते । परिस्यन्दते । अभिस्यन्दते । निस्यन्दते । अप्राणिषु इति किम् । अनुस्यन्दते मत्स्य उदके । प्राण्यप्राणिविषयस्य अपि स्यन्दतेः अयम् विकल्पो भवति, अनुष्यन्देते मत्स्योदके, अनुस्यन्देते । अप्राणिषु इति पर्युदासोऽयम्, न प्रसज्यप्रतिषेधः । एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात् । अनुष्यन्दते अनुस्यन्दते वा जलम् । अप्राणिषु किम् । अनुस्यन्दते हस्ती । अप्राणिष्विति पर्युदासान्मत्स्योदकेअनुष्यन्देते इत्यत्रापि पक्षे षत्वं भवत्येव । प्राणिषु नेत्युक्तौ तु न स्यात् (दीक्षितः, सू.सं., २३४९) ।

**वेः स्कन्देरनिष्ठायाम् ८।३।७३॥**

वेः उपसर्गादुत्तरस्य स्कन्देः सकारस्य मूर्धन्यो वा भवति अनिष्ठायाम् (काशिकावृत्तिः, ८।३।७३॥) । विष्कन्ता, विस्कन्ता । विष्कन्तुम्, विस्कन्तुम् । विषन्तव्यम्, विस्कन्तव्यम् । अनिष्ठायाम् इति किम् ? विस्कन्नः । सिद्धान्तकौमुद्यान्तु षत्वं वा स्यादित्यस्ति । कृत्येवेदम् । अनिष्ठायामिति पर्युदासात् । विष्कन्ता । विस्कन्ता । निष्ठायां तु । विस्कन्नः (दीक्षितः, सू.सं., २३९८) ।

**परेश्च ८।३।७४॥**

परिशब्दादुत्तरस्य स्कन्देः सकारस्य वा मूर्धन्यो भवति (काशिकावृत्तिः, ८।३।७४॥) । परिष्कन्ता । परिष्कन्तुम् । परिष्कन्तव्यम् । परिस्कन्ता । परिस्कन्तुम् । परिस्कन्तव्यम् । पृथग्योगकरणसामर्थ्यातनिष्ठायाम् इत्येतन् न अनुवर्तते । परिष्कण्णः, परिस्कन्नः । अस्मात्परस्य स्कन्देः सस्य षो वा । योगविभागादनिष्ठायामिति न संबध्यते । परिष्कन्दति । परस्कन्दति । परिष्कण्णः । पिरस्कन्नः । षत्वपक्षे णत्वम् । न च पदद्वयाश्रयतया बहिरङ्गत्वात्षत्वस्यासिद्धत्वम् । धातूपसर्गयोः कार्यमन्तरङ्गमत्य-भ्युपगमात् (दीक्षितः, सू.सं., २३९९) । पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेनेति भाष्यम् । पूर्वं साधनेनेति मतान्तरे तु न णत्वम् ।

**स्फुरतिस्फुलत्योर्निर्निविभ्यः ८।३।७६॥**

स्फुरतिस्फुलत्योः सकारस्य निस् नि वि इत्येतेभ्यः उत्तरस्य वा मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।७६॥) स्फुरति निष्फुरति, निस्स्फुरति । निष्फुरति, निस्फुरति । विष्फुरति, विस्फुरति । स्फुलति निष्फ्फुलति, निस्स्फुलति । निष्फुलति, निस्फुलति । विष्फुलति, विस्फुलति । षत्वं वा स्यात् । निःष्फुस्फुरति । निःस्फुरति । स्फर इत्यकारोपधं केचित्पठन्ति । पस्फार (दीक्षितः, सू.सं., २५३७) ।

**वेः स्कभ्नातेर्नित्यम् ८।३ ।७७ ॥**

वेः उत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्धन्यादेशो भवति । विष्कभ्नाति । विष्कम्भिता । विष्कम्भितुम् । विष्कम्भितव्यम् । वेः परस्य स्कभ्नातेः सस्य षः स्यात् । विष्कभ्नोति । विष्कभ्नाति । स्कुभ्नोति । स्कुभ्नाति (दीक्षितः, सू.सं., २५५६) ।

**समासेऽङ्गलेः संगः ८।३।८०॥**

सङ्गसकारस्य अङ्गुलेः उत्तरस्य मूर्धन्य आदेशो भवति समासे (काशिकावृत्तिः, ८।३।८०॥) । अङ्गुलेः सङ्गः अङ्गुलिषङ्गः । अङ्गुलिषङ्गा यवागूः । अङ्गुलिषङ्गो गाः सादयति । समासे इति किम् ? अङ्गुलेः सङ्गं पश्य । अङ्गुलिशब्दात्सङ्गस्य सस्य मूर्धन्यः स्यात्समासे । अङ्गुलिषङ्गः । समासे किम् । अङ्गुलेः सङ्गः (दीक्षितः, सू.सं., १०१९) ।

**भीरोः स्थानम् ८।३।८१॥**

स्थानसकारस्य भीरोः उत्तरस्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।८१॥) । भीरुष्ठानम् । समासे इत्येव, भीरोः स्थानं पश्य । भीरुशब्दात् स्थानस्य सस्य मूर्धन्यः स्यात्समासे । भीरुष्ठानम् । असमासे तु । भीरोः स्थानम् (दीक्षितः, सू.सं. १०२०) ।

**अग्नेः स्तुत्स्तोमसोमाः ८।३।८२॥**

अग्नेः उत्तरस्य स्तुत् स्तोम सोम इत्येतेषां सकारस्य मूर्धन्यादेशो भवति समासे (काशिकावृत्तिः, ८।३।८२॥) अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमः । अग्नेर्दीघात् सोमस्य इष्यते । तेन इह न भवति, अग्निसोमौ माणवकौ । तथा च ज्योतिरग्निः, सोमः लताविशेषः, अग्निसोमौ तिष्ठतः । समासे इत्येव, अग्नेः स्तोमः । अग्नेः परेषामेषां सस्य षः स्यात्समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ । अग्नीवरुणौ (दीक्षितः, सू.सं., ९२४) ।

**ज्योतिरायुषः स्तोमः ८।३।८३॥**

ज्योतिसायुसित्येताभ्यामुत्तरस्य् स्तोमसकारस्य मूर्धन्यादेशो भवति समासे (काशिकावृत्तिः, ८।३।८३॥) ज्योतिष्टोमः । आयुष्टोमः । समासे इत्येव, जोतिः स्तोमं दर्शयति । आभ्यां स्तोमस्य सस्य मूर्धन्यः स्यात्समासे । ज्यातिष्टोमः । आयुष्टोमः । समासे किम् । ज्योतिषः स्तोमः (दीक्षितः, सू.सं., १०२१) ।

**मातृपितृभ्यां स्वसा ८।३।८४॥**

मातृ-पितृ-इत्येताभ्यामुत्तरस्य स्वसृसकारस्य समासे मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।८४॥) । मातृष्वसा । पितृष्वसा । आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे । मातृष्वसा । पितृष्वसा । असमासे तु । मातुः स्वसा । पितुः स्वसा (दीक्षितः, सू.सं., ९८४) ।

**मातुः पितुर्भ्यामन्यतरस्याम् ८।३।८५॥**

मातुर्पितुरित्येताभ्यामुत्तरस्य स्वसृशब्दस्य अन्यतरस्यां मूर्धन्यादेशो भवति समासे (काशिकावृत्तिः, ८।३।८५॥) । मातुःष्वसा, मातुःस्वसा । पितुःष्वसा, पितुःस्वसा । मातुः पितुः इति रेफान्तयोरेतद् ग्रहणम् । एकदेशविकृतस्य अनन्यत्वाद् विसर्जनीयान्ता सकारान्तात् च षत्वं भवति । समासे इत्येव, वाक्ये मा भूत् । मातुः स्वसा इत्येव नित्यं भवति । आभ्यां स्वसुः सस्य षो वा स्यात्समासे । मातुःस्वसा । मातुःष्वसा । पितुःष्वसा । पितुःस्वसा । लुक्पक्षे तु । (दीक्षितः, सू.सं., ९८३) ।

**अभिनिसः स्तनः शब्दसंज्ञायाम् ८।३।८६॥**

अभिनिसित्येतस्मातुत्तरस्य स्तनतिसकारस्य मूर्धन्यादेशो भवति अन्यतरस्यां शब्दसंज्ञायां गम्यमानायाम् (काशिकावृत्तिः, ८।३।८६॥) । अभिनिष्टानो वर्णः, अभिनिस्तानो वर्णः । अभिनिष्टानो विसर्जनीयः, अभिनिस्तानो विसर्जनीयः । शब्दसंज्ञायाम् इति किम् ? अभिनिस्तनति मृदङ्गः । समासे इति अतःप्रभृति निवृत्तम् । अस्मात् स्तनेः सस्य मूर्धन्यः । अभिनिष्टानो वर्णः । शब्दसञ्ज्ञायां किम् । अभिनिःस्तनति मृदङ्गः (दीक्षितः, सू.सं., ३१९३) ।

**उपसर्गप्रादुर्भ्यामस्तिर्यच्च्वपरः ८।३।८७॥**

उपसर्गस्थान् निमित्तात् प्रादुस्शब्दाच् च उत्तरस्य यकारपरस्य अच्परस्य च अस्तिसकारस्य मूर्धन्यो भवति (काशिकावृत्तिः, ८।३।८७॥) । अभिषन्ति । निषन्ति । विषन्ति । प्रादुःषन्ति । अभिष्यात् । निष्यात् । विष्यात् । प्राडुःष्यात् । उपसर्गातिति किम् ? दधि स्यात् । मधु स्यात् । अस्तीति किम् ? अनुसृतम् । विसृतम् । अथ असत्यपि अस्तिग्रहणे सकारम् एव प्रति उपसर्ग आश्रीयते, प्रादुःशब्दस्य च कृभ्वस्तिष्वेव प्रयोगः इति अन्यत्राप्रसङ्गः ? तथापि एतत् प्रत्युदाहर्तव्यम्, अनुसूते अनुसूः, अनुस्वोऽपत्यं आनुसेयः । **शुभ्रादित्वाड् ढक्** ४।१।१२३॥, **ढे लोपोऽकद्र्वाः** ६।४।१४७॥ इति उवर्नलोपः । यच्परः इति किम् ? निस्तः । विस्तः । प्रादुस्तः । उसर्गेऽणः प्रादुसश्च परस्यास्तेः सस्य षः स्यारद्यकासेऽचि च परे (दीक्षितः, सू.सं., २४७२) । निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुः षन्ति । यच्परः किम् । अभिस्तः ।

**सुविनिदुर्भ्यः सुपिसूतिसमाः ८।३।८८॥**

सु-वि-निर्दुरित्येतेभ्यः उत्तरस्य सुपि सूति सम इत्येतेषां सकारस्य मूर्धन्यादेशो भवति । सुपि इति स्वपिः कृतसम्प्रसारणो गृह्यते (काशिकावृत्तिः, ८।३।८८॥) । सुषुप्तः । विषुप्तः । निःषुप्तः । दुःषुप्तः । सूतीति स्वरूपग्रहणम् । सुषूतिः । विषूतिः । निःषूतिः । दुःषूतिः । सम सुषमम् । विषमम् । निःषमम् । दुःषमम् । सुपेः षत्वं स्वपेर्मा भूद् विसुष्वापेति केन न । हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् । स्थादीनां नियमो नात्र प्राक् सितादुत्तरः सुपिः । अनर्थके विषुषुपुः सुपिभूतो द्विरुच्यते । पूर्वत्रासिद्धीयमद्विर्वचने इति कृते ष्ट्वे ततो द्विर्वचनम् । एभ्यः सुप्यादेः सस्य षः स्यात् (दीक्षितः, सू.सं., २४७७) ।

पूर्वं धातुरुपसर्गेण युज्यते । किति लिटि परत्वात्संप्रसारणे षत्वे च कृते द्वित्वम् । (परिभाषा-) पूर्वत्रासिद्धीयमद्विर्वचने । सुषुषुपतुः । सुषुषुपुः । अकिति तु द्वित्वेऽभ्यासस्य संप्रसारणम् । षत्वस्यसिद्धत्वात्ततः पूर्वं **हलादिः शेषः** नित्यत्वाच्च् । ततः सुपिरूपाभावान्न षः । सुसुष्वाप । सुस्वप्ता । अस्वपीत् । अस्वपत् । स्वप्यात् । सुप्यात् । सुषुप्यात् । अस्वाप्सीत् । १०६९ श्वस प्राणने । श्वसिति । श्वसिता । अश्वसीत्-अश्वसत् । श्वस्याताम् । श्वस्यास्ताम् । ह्म्यन्तक्षण... इति न वृद्धिः । अश्वसीत् ।

**निनदीभ्यां स्नातेः कौशले ८।३।८९॥**

नि-नदी इत्येताभ्यामुत्तरस्य स्नातिसकारस्य मूर्धन्यादेशो भवति कौशले गम्यमाने (काशिकावृत्तिः, ८।३।८९॥) । निष्णातः कटकरणे । निष्णातो रज्जुवर्तते । नद्यां स्नातीति नदीष्णः । **सुपि स्थः** ३।२।४ इत्यत्र सुपि इति योगविभागात् कप्रत्ययः । कौशले इति किम् ? निस्नातः । नद्यां स्नातः नदीस्नातः इति । आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये (दीक्षितः, सू.सं., ३०८०) । निष्णातः । शास्त्रेषु । नद्यां स्नातीति नदीष्णः ।

**गवियुधिभ्यां स्थिरः ८।३।९५॥**

गवियुधिभ्यामुत्तरस्य स्थिरसकारस्य मूर्धन्यादेशो बवति (काशिकावृत्तिः, ८।३।९५॥) । गविष्ठिरः । युधिष्ठिरः । गोशब्दादहलन्तादपि एतस्मादेव निपातनात् सप्तम्या अलुग् भवति । आभ्यां स्थिरस्य सस्य षः स्यात् (दीक्षितः, सू.सं., ९६७) । गविष्ठिरः । अत्र गवीति वचनादेवालुक् । युधिष्ठिरः । अरण्येतिलकाः । अत्र संज्ञायाम् इति सप्तमीसमासः । हृद्द्युभ्यां च (वार्तिकम्) । हृदिस्पृक् । दिविस्पृक् ॥

**विकुशमिपरिभ्यः स्थलम् ८।३।९६॥**

वि-कु-शमि-परि इत्येतेभ्यः उत्तरस्य स्थलसकारस्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।९६॥) । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् । एभ्यः स्थलस्य सस्य षः स्यात् । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् । (दीक्षितः, सू.सं., ३०८५) ।

**अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ८।३।९७॥**

अम्ब आम्ब गो भूमि सव्य अप द्वि त्रि कु शेकु शङ्कु अङ्गु मञ्जि पुञ्जि परमे बर्हिस् दिवि अग्नि इत्येतेभ्यः उत्तरस्य स्थशब्दसकारस्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।९७॥) । अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्येष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शङ्कुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । परमेष्ठः । वर्हिष्ठः । दिविष्ठः । अग्निष्ठः । स्थास्थिन्स्थककणाम् इति वक्तव्यम् । सव्येष्ठाः । परमेष्ठी । सव्येष्ठृसारथिः । स्थ इति कप्रत्ययान्तस्यानुकरणम् (दीक्षितः, सू.सं., २९१८) । षष्ठ्यर्थे प्रथमा । एभ्यः स्थस्य सस्य षः स्यात् । द्विष्ठः । त्रिष्ठः । इत ऊर्ध्वं कर्मणि सुपीति द्वयमप्यनुवर्तते । तत्राकर्मकेषु सुपीत्यस्य सम्बन्धः ।

**सुषामादिषु च ८।३।९८॥**

सुषामादिषु शब्देषु सकारस्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।९८॥) । शोभनं साम यस्य असौ सुषामा ब्राह्मणः । दुष्षामा । निष्षामा । निष्षेधः । दुष्षेधः । सुशब्दस्य कर्मप्रवचनीयसंज्ञाकत्वान् निर्दुर्शब्दयोश्च क्रियान्तर-विषयत्वादनुपसर्गत्वे सति पाठोऽयम् । **सेधतेर्गतौ** ८।३।११३॥ इति वा प्रतिषेधबाधनार्थः । सुषन्धिः । दुष्षन्धिः । निष्षन्धिः । सुष्ठु । दुष्ठु । तिष्ठतेरुणादिष्वेतौ व्युत्पाद्येते । गौरिषक्थः संज्ञायाम् । ङ्यापोः **संज्ञाछन्दसोर्बहुलम्** ६।३।६३॥ इति पूर्वपदस्य ह्रस्वत्वम् । प्रतिष्णिका । प्रतिष्णाशब्दादयं कन् प्रत्ययः । जलाषाहम् । नौषेचनम् । दुन्दुभिषेवणम् । एति संज्ञायामगात् । एकारपरस्य सकारस्य मूर्धन्यादेशः भवति इण्कोरुत्तरस्य अगकारात् परस्य संज्ञायां विषये । हरिषेणः । वारिषेणः । जानुषेणी । नक्षत्रवाचिनः शब्दादुत्तरस्य सकारस्य वा एति संज्ञायामगकारात् मूर्धन्यो भवति । रोहिणीषेणः, रोहिणीसेनः । भरणीषेणः, भरणीसेनः । अगकारातित्येव, शतभिषक्षेनः । सस्य मूर्धन्यः । शोभनं साम यस्य सुषामा । सुषन्धिः । (दीक्षितः, सू.सं., १०२२) ।

**एति संज्ञायामगात् ८।३।९९॥**

सस्य मूर्धन्यः । हरिषेणः । एति किम् । हरिसक्थम् । संज्ञायां किम् । पृथुसेनः । अगकारात् किम् । विष्वक्सेनः ।

इण्कोरित्येव । सर्वसेनः (दीक्षितः, सू.सं., १०२३) ।

**नक्षत्राद्वा ८।३।१००॥**

एति सस्य संज्ञायामगकारान्मूर्धन्यो वा । रोहिणीषेणः । रोहिणीसेनः । अगकारात्किम् । शतभिषक्सेनः । आकृतिगणोऽयम् (दीक्षितः, सू.सं., १०२४) ।

**ह्रस्वात्तादौ तद्धिते ८।३।१०१॥**

ह्रस्वादुत्तरस्य सकारस्य मूर्धन्यादेएशो भवति तादौ तद्धिते परतः (काशिकावृत्तिः, ८।३।१०१॥) । तरप् तमप् तय त्व तल् त्यप्, एतानि प्रयोजयन्ति । तरप् सर्पिष्टरम् । यजुष्टरम् । तमप् सर्पिष्टमम् । यजुष्टमम् । तय चतुष्टये ब्राह्मणानां निकेताः । त्व सर्पिष्ट्वम् यजुष्ट्वम् । तल् सर्पिष्टा । यजुष्टा । तस् सर्पिष्टः । यजुष्टः । त्यप् आविष्ट्यो वर्धते । ह्रस्वातिति किम् ? गीस्तरा । धूस्तरा । तादौ इति किम् ? सर्पिस्साद् भवति । प्रत्ययसकारस्य **सात् पदाद्योः** ८।३।१११॥ इति सत्यपि प्रतिषेधे प्रकृतिसकारस्य स्यात् । तद्धिते इति किम् ? सर्पिस्तरति । तिङन्तस्य प्रतिषेधो वक्तव्यः । भिन्द्युस्तराम् । छिन्द्युस्तराम् । ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते (दीक्षितः, सू.सं., १३२५) । निर्गतो वर्णाश्रमेभ्यो निष्टयश्चाण्डालादिः । अरण्याण्णः (वार्तिकम्) ॥ आरण्याः सुमनसः । दूरादेत्यः (वार्तिकम्) ॥ दूरेत्यः । उत्तरादाहञ् ॥ औत्तराहः ॥

**निसस्त पतावनासेवने ८।३।१०२॥**

निसः सकारस्य मूर्धन्यादेशो भवति तपतौ परतोऽनासेवनेऽर्थे (काशिकावृत्तिः, ८।३।१०२॥) । आसेवनं पुनः पुनः करणम् । निष्टपति सुवर्णम् । सकृदग्निं स्पर्शयति इत्यर्थः । अनासेवने इति किम् ? निस्तपति सुवर्णं सुवर्णकारः । पुनः पुनरग्निं स्पर्शयति इत्यर्थः । निष्टप्तं रक्षो निष्टप्ता अरातयः इत्यत्र सदप्यासेवनं न विवक्ष्यते । छान्दसो वा वर्नविकारः । षः स्यात् । आसेवनं पौनः पुन्यं ततोऽस्यस्मिन्विषये । निष्टपति । (दीक्षितः, सू.सं., २४०३) ।

**युष्मत्तत्ततक्षुष्वन्तःपादम्  ८।३।१०३॥**

युष्मत् तत् ततक्षुसित्येतेषु तकारादिषु परतः सकारस्य मूर्धन्यादेशो भवति, स चेत् सकारोऽन्तःपादं भवति (काशिकावृत्तिः, ८।३।१०३॥) । युष्मदादेशाः त्वम्, त्वाम्, ते, तव । अग्निष्ट्वं नामासीत् । त्वा अग्निष्ट्वा वर्धयामसि । ते अग्निष्टे विश्वमानय । तव अप्स्वग्ने सधिष्टव । तत् अग्निष्टद् विश्वमापृणाति । ततक्षुस् द्यावापृथिवी निष्टतक्षुः । अन्तःपादम् इति किम् ? यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जतवेदा विच । पादमध्यस्थस्य सस्य मूर्धन्यः स्यात्तकारादिष्वेषु परेषु (दीक्षितः, सू.सं., ३६४०) । युष्मदादेशाः त्वंत्वातेतवाः । त्रिभिष्ट्वं देव सवितः । तेभिष्ट्वा । आभिष्टे । अप्स्वग्ने सधिष्टव । अग्निष्टद्विश्वम् । द्यावा पृथिवी निष्टतक्षुः । अन्तः पादं किम् । तदग्निस्तदर्यमा । यन्म आत्मनो मिन्दाभूदग्निस्तत्पनराहार्जातवेदा विचर्षणिः । अत्राग्निरिति पूर्वपादस्यान्तो न तु मध्यः ।

**यजुष्येकेषाम्  ८।३।१०४॥**

यजुषि विषये युष्मत्तत्ततक्षुःषु परत एकेषामाचार्याणां मतेन सकारस्य मूर्धन्यादेशो भवति (काशिकावृत्तिः, ८।३।१०४॥) । अर्चिर्भिष्ट्वम्, अर्चिर्भिस्त्वम् । अग्निष्टेऽग्रम्, अग्निस्तेऽग्रम् । अग्निष्टत्, अग्निस्तत् । अर्चिर्भिष्टतक्षुः अर्चिर्भिस्ततक्षुः । युष्मत्तत्ततक्षुषु परतः सस्य मूर्धन्यो वा । अर्चिभिष्ट्वम् । अग्निष्टे अग्रम् । अर्चिभिष्टतक्षुः । पक्षे अर्चिभिस्त्वमित्यादि (दीक्षितः, सू.सं., ३६४१) ।

**स्तुतस्तोमयोश्छन्दसि ८।३।१०५॥**

काशिकायामेकेषाम् इति वर्तते । स्तुत स्तोम इत्येतयोः सकारस्य छन्दसि विषये मूर्धन्यादेशो भवति एकेषामाचार्याणां मतेन (काशिकावृत्तिः, ८।३।१०५॥) । त्रिभिष्टुतस्य, त्रिभिस्तुतस्य । गोष्टोमं षोडशिनम्, गोस्तोमं षोडशिनम् । पूर्वपदातित्येव सिद्धे प्रपञ्चार्थम् इदम् । नृभिष्टुतस्य । नृभिःस्तुतस्य । गोष्टोमम् । गोस्तोमम् । (दीक्षितः, सू.सं., ३६४२) । पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम् ।

**पूर्वपदात्  ८।३।१०६॥**

छन्दसि इति वर्तते, एकेषाम् इति च (काशिकावृत्तिः, ८।३।१०६॥) । पूर्वपदस्थान्निमित्तात् परस्य सकारस्य मुर्धन्यादेशो

भवति छन्दसि विषये एकेषामाचार्याणां मतेन । द्विषन्धिः । द्विसन्धिः । त्रिषन्धिः, त्रिसन्धिः । मधुष्ठानम्, मधुस्थानम् । द्विषाहस्रं चिन्वीत, द्विसाहस्रं चिन्वीत । असमासेऽपि यत् पूर्वपदं तदपि इह गृह्यते । त्रिः षमृद्धत्वाय, त्रिः समृद्धत्वाय । पूर्वपदस्थान्निमित्तात्परस्य सस्य षो वा (दीक्षितः, सू.सं., ३६४३) । यदिन्द्राग्नी दिविष्ठः । युवं हि स्थः स्वर्पती ।

**सुञः ८।३।१०७॥**

सुञिति निपात इह गृह्यते, तस्य पूर्वपदस्थान्निमित्तातुत्तरस्य मूर्धन्यादेशो भवति छन्दसि विषये (काशिकावृत्तिः, ८।३।१०७॥) । अभी षु णः सखीनाम् । ऊर्ध्व ऊ षु ण ऊतये । पूर्वपदस्थान्निमित्तात्परस्य सुञो निपातस्य सस्य षः (दीक्षितः, सू.सं., ३६४४) । ऊर्ध्व ऊषुणः । अभीषुणः ।

**सनोतेरनः ८।३।१०८॥**

सनोतेः अनकारान्तस्य सकारस्य मूर्धन्यादेशो भवतीति सूत्रार्थः (काशिकावृत्तिः, ८।३।१०८॥) । गोषाः । नृषाः । अत्र केचित् सवनादिपाठाद् गोसनिर्नियमस्य फलं न भवतीति सिसानयिषतीति प्रयुदाहरन्ति (दीक्षितः, सू.सं., ३६४५) ।

**सहेः पृतनर्ताभ्यां च ८।३।१०९॥**

पृतना ऋत इत्येताभ्यामुत्तरस्य सहिसकारस्य मूर्धन्यादेशो भवतीति सूत्रार्थः (काशिकावृत्तिः, ८।३।१०९॥) । पृतनाषाहम् । ऋताषाहम् । केचित् सहेः इति योगविभागं कुर्वन्ति । ऋतीषहम् इत्यत्रापि यथा स्यात् । ऋतिशब्दस्य पूर्वपदस्य् संहितायाम् एतद् दीर्घत्वम् । अवग्रहे तु ऋतिसहम् इत्येव भवति । चकारोऽनुक्तसमुच्चयार्थः, तेन ऋतीषहम् इति सिद्धम् । पृतनाषाहम् । ऋताषाहम् । चात् ऋतीषाहम् (दीक्षितः, सू.सं., ३६४६) ।

## निष्कर्षः

पाणिनीयाष्टाध्याय्यामष्टमाध्याये द्वितीयपादे **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** ८।२।३६॥ इति सूत्रादारभ्य तृतीयपादे **सहेः पृतनर्ताभ्यां च** ८।३।१०९॥ इति सूत्रपर्यन्तं षत्वविधायकानि द्विपञ्चाशत्-(५२)सूत्राणि पाणिनिना प्रस्तुतानि सन्ति । सिद्धान्तकौमुद्यां नैकत्रस्थले षत्वविषयिणी चर्चा विद्यते । तद्ग्रन्थाध्ययनेन षत्वविषये विचिकित्सा सदैव वरीवर्ति । पाणिनीयमतमनुसृत्य षत्वनिर्वचनम्, तस्य स्वरूपप्रकाशनं षत्वविधायकसूत्रार्थप्रदर्शनपूर्वकं तेषां सोदाहरणं प्रयोगादीनां पर्यालोचनमत्र विहितमस्ति । तथैव भट्टोजिदीक्षितकृतसिद्धान्तकौमुद्यां यत्र तत्र विकीर्णतया स्थितानां षत्वविधायकसूत्राणां परिशीलनं तेषां सरलतया विवेचनञ्चात्र प्रदर्शितमस्ति । यद्यप्यष्टाध्यायीं वार्तिकादिकञ्चानुसृत्य महाभाष्यवैयाकरणसिद्धान्त-कौमुद्यादिग्रन्थेषु षत्वविधानं प्रदर्शितमस्ति । तथापि महाभाष्यस्य सागरवदतिगभीरत्वाद् दुरूहत्वाच्च तथा च वैयाकरणसिद्धान्तकौमुद्यां नैकस्मिन् प्रकरणे षत्वविधानं वर्तते, तद्ग्रन्थे यत्र तत्र तस्य विकीर्णत्वाच्च तद्ग्रन्थाध्ययनेनापि षत्वस्य सम्यग्ज्ञानं सारल्येन नैवानुभूयते जनैः । काशिकावृत्त्यादिग्रन्थानामध्ययनेनापि तस्य ज्ञानं कठिनमेव । अन्यत्र नैकस्मिन् प्रकरणे लेखे वा एतादृशः प्रयासो न मया व्यलोकि । अतो पाणिनीयव्याकरणे षत्वविधानं यद् वर्तते, तस्यानायासेन ज्ञानाय साधारणजनानामपि महोपकाराय भवेदिति मदीयो प्रयासः । कृतेऽपि श्रमे भ्रमात् प्रमादादज्ञानाद्वा निबन्धेऽस्मिन् यास्त्रुटयः स्युस्तासां कृते क्षन्तव्योऽयमल्पज्ञो गुणग्राहिभिः सुधीभिः ।

## सन्दर्भसूची


झा, उदयशङ्करः (सन् २०१३), *अधिगमकौमुदी,* वाराणसी : चौखम्बा सुरभारती प्रकाशन ।

दीक्षितः, भट्टोजिः (सन् १९८२), *वैयाकरणसिद्धान्तकौमुदी,* वासुदेवदीक्षितविरचितया बालमनोरमया, ज्ञानानन्दसरस्वती-विरचितया तत्त्वबोधिन्या सहिता भागाः १-४, सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा, दिल्ली : मोतीलाल-बनारसीदासः ।

………………… (सन् १९९७), *वैयाकरणसिद्धान्तकौमुदी,* सम्पा. गोपालशास्त्री नेने, वाराणसी : चौखम्बा अमरभारती प्रकाशनम् ।

………………… (सन् २०००), *वैयाकरणसिद्धान्तकौमुदी,* सम्पा., गोपालदत्तपाण्डेयः, वाराणसी : चौखम्बा विद्याभवन ।

पतञ्जलिः (२०४४), *व्याकरणमहाभाष्यम्,* (कैय्यटविरचितेन प्रदीपेन नागेशभट्टविरचितेनोद्योतेन सहितम्) सम्पा.

बालशास्त्री, वाराणसी : वाणीविलासप्रकाशनम् ।

पाणिनिः (सन् १९९२), *अष्टाध्यायी,* परिष्कारः गोपालशास्त्री नेने, सम्पा. गोपालदत्तपाण्डेयः, वाराणसी : चौखम्बा सुरभारतीप्रकाशनम् ।

--------- (सन् १९५५), *गणपाठः,* वेदाङ्गप्रकाशः, (चतुर्दशो भागः), (द्वि.सं.), व्याख्या दयानन्दसरस्वती, अजमेरनगर : वैदिकयन्त्रालये मुद्रितम् ।

............... (सन् २०११), *धातुपाठः,* सम्पा. नरेश झा, वाराणसी : चौखम्बा सुरभारती प्रकाशन ।

वामनजयादित्यौ (सन् १९६७), *काशिकावृत्तिः,* जिनेन्द्रबुद्धिविरचितेन न्यासेन हरदत्तमिश्रविरचितया पदमञ्जर्या सहिता, भागः ६, सम्पा. द्वारिकादासशास्त्री, कालिकाप्रसादशुक्लः, वाराणसी : तारा-पब्लिकेशन ।

शास्त्री, भीमसेनः (सन् २०१४), *लघुसिद्धान्तकौमुदी-भैमीव्याख्या,* (अ.सं.), दिल्ली : भैमी प्रकाशन ।